# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – नवम्बर-दिसम्बर, २०१६

| | | |
|---|---|---|
| कक्षा – आचार्यप्रथमवर्षम् (SEM-1) | **प्रश्नपत्रम् – २** | गुणाः - ७० |
| विषयः – नव्यन्यायः | **कोड – C.C.4.1.1** | समयः – ०३ तः ०६ पर्यन्तम् |
| दिनाङ्कः – ०६/१२/२०१६ | सन्दर्भग्रन्थः – पक्षता | |

---

प्रथमान्वितिः (युनिट-१)

प्रश्नः -१ **द्वयोरेकस्य समाधानं सप्रसङ्गं दत्त ।** ०४

(१) सन्दिग्धसाध्यधर्मत्वं पक्षत्वमिति प्रतिपादयत।

(२) 'अवच्छिन्नत्वं च अन्यूनवृत्तित्वम्' व्याख्यात।

प्रश्नः -२ **द्वयोः व्याख्या कार्या ।** १२

(१) पक्षतानिरूपणे प्रसङ्गसङ्गतिं व्याख्यात।

(२) दीधितेः पक्षतालक्षणं सदलकृत्यं व्याख्यात ।

(३) अत्रोच्यतेत्यनेन संशयत्वपरिष्कारं कुरुत।

प्रश्नः -३ **निम्नेषु चतुर्णामेकैकवाक्येन उत्तरं देयम् ।** ०४

(१) सन्देहो हि न विशेषणं कुतः?

(२) अनुमितिं प्रति प्रतिबन्धकः कः?

(३) तद्वत्ताबुद्धिं प्रति तदभाववत्तनिश्चयः कः?

(४) पक्षनिष्ठाभावप्रतियोगित्वनिश्चय एव सुलभो बाधः कुत्र?

(५) सङ्गतिः का?

(६) लिखनसङ्क्षेपनिर्बन्धीति कस्य अपरं नाम वर्तते?

द्वितीयान्वितिः (युनिट-२)

प्रश्नः -४ **द्वयोरेकस्य उत्तरं सन्दर्भसहितं देयम् ।** ०४

(१) मिश्रमते पक्षतात्वं निरूप्य वारयत।

(२) संशययोग्यतायाः पक्षतात्वं निरूपयत ।

प्रश्नः -५ **एकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखत ।** ०८

(१) साधकमानं साध्यवत्त्वनिश्चय इति व्याख्यात।

(२) धूमेन अनुमिनुयामितीच्छायाः आलोकपरामर्शः प्रतिबन्धक इति व्याख्यात।

प्रश्नः -६ **त्रयाणाम् अतिलघूत्तराणि लेख्यानि ।** ०३

(१) कः समुच्चयः?

(२) साध्यसन्देहः अनुमितौ हेतुर्नवा?

(३) नापि साधकबाधकमानाभावः कुतः?

(४) साधकबाधकमानाभावपदं किम्?

(५) न हि करि-----------पूरयत।

तृतीयान्वितिः (युनिट-३)

प्रश्नः -७ **द्वयोरेकस्य उत्तरं सन्दर्भसहितं देयम् ।** ०४

(१) लिङ्गभेदेन पक्षताभेदनिरूपणं निरूपयत।

(२) लिङ्गविशेषेणापि च नियन्त्रित्वं पक्षत्वमिति व्याख्यात।

प्रश्नः -८ **एकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखत ।** १२

(१) 'सिषाधयिषाविरहसहकृतसाधकमानाभावो पक्षता' व्याख्यात ।

(२) सिषधयिषायाः स्वरूपं निरूपयत।

प्रश्नः -९ **द्वयोरेकस्य टिप्पणीं ददातु ।** ०४

(१) सहकृतान्तविशेषणसार्थक्यम्।

(२) यत्रानुमित्सानन्तरमित्यादिना स्थलत्रये विशेषणस्य प्रयोजनं स्पष्टयत।

चतुर्थान्वितिः (युनिट-४)

प्रश्नः -१० **एकस्योत्तरं सन्दर्भसहितं देयम् ।** ०४

(१) साधकमानपदार्थविमर्शं विमृशत।

(२) अनुमितिप्रतिबन्धकत्वं व्याख्यात।

प्रश्नः -११ **एकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखत ।** ०८

(१) साध्यसिद्धेः प्रतिबन्धकत्वं स्पष्टयत ।

(२) अवच्छेदकावच्छेदेनानुमितिं प्रति कीदृशसिद्धिः प्रतिबन्धिका? विवृणुत।

प्रश्नः -१२ **एकैकवाक्येन त्रयाणाम् उत्तरं लेखनीयम् ।** ०३

(१) सामानाधिकरण्येनानुमितिं प्रति कस्य विरोधित्वम्?

(२) यत्र वा उभयाभावः तत्र कथं पक्षत्वम्?

(३) सिषाधयिषा का?

(४) प्रत्यक्ष---------------तर्करसिकाः पूरयत।

(५) व्याप्तिनिरूपणानन्तरं किं निरूप्यते?

***

# समाधानानि

कक्षा – आचार्यप्रथमवर्षम् (SEM-1) **प्रश्नपत्रम् – २** गुणाः - ७०

विषयः – नव्यन्यायः **कोड – C.C.4.1.1** समयः – ०३ तः ०६ पर्यन्तम्

दिनाङ्कः – ०६/१२/२०१६ सन्दर्भग्रन्थः – पक्षता

प्रश्नः- ३

१. लिङ्गदर्शनव्याप्तिस्मरणादिना तस्य नाशात्।

२. बाधज्ञानम्।

३. प्रतिबन्धकः।

४. केवलान्वयिसाध्यके।

५. अनुकूलत्वसङ्गतिः।

६. दीधितिकारस्य।

प्रश्नः- ६

१. एकस्मिन् धर्मिणि नानाधर्मावगाहिनिर्णयः।

२. हेतुरेव।

३. उभयाभावस्य प्रत्येकं सत्त्वेपि सत्त्वात्।

४. सिद्ध्यभावबाधाभावपरम्।

५. न हि करिणि दृष्टे चीत्कारेण तमनुमिमते अनुमातारः।

प्रश्नः-१२

१. सिद्धिमात्रस्य।

२. विशिष्टाभावात् पक्षत्वम्।

३. तत्साध्यविशिष्टतत्पक्षविषयकत्वप्रकारिकानुमितिविषयिणीच्छा।

४. परिकलितमप्यर्थमनुमानेनबुभुत्सन्ते।

५. पक्षधर्मता।